वा धर्षयिष्यन्ति नैरृताः । न च ते सदृशो राम ! वीर्य्येणान्यो भविष्यति । सदेवनरनागेषु लोकेष्विह पुमांस्त्रिषु । न सौभाग्ये, न दाक्षिण्ये, न बुद्धिस्मृतिपौरुषे ॥ नोत्तरे प्रतिपत्तव्ये त्वत्तुल्यो वा भविष्यति । एतद्विद्याद्वयं प्राप्य यशश्चाव्ययमाप्स्यसि ॥ बलामतिबलां चैव ज्ञानविज्ञानमातरौ । क्षुत्पिपासे च ते राम ! नात्यर्थं पीड़यिष्यतः ॥ जयस्व दुर्गकान्तारप्रदेशेष्वटवीषु च । ख्यातां त्रिषु लोकेषु गमिष्यसि च राघव ! ॥ पितामहसुते ह्येते विद्ये चायुर्बलावहे । पात्रं त्वमसि काकुत्स्थ ! विद्ययोर्ग्रहणेऽनयोः ॥ स्वभावजैर्गुणैर्दिव्यैः कर्म्मजैर्बहुलैर्वृतः । भूयस्तव गुणोत्कर्षमेते विद्ये करिष्यतः ॥ ततो रामो जलं स्पृष्ट्वा प्राञ्जलिः प्रणतः स्थितः । प्रतिजग्राह ते विद्ये विश्वामित्रात् तपोधनादिति" । अतिशयितं बलम् प्रा० स० । अत्यन्ते बले, सामर्थ्ये, सैन्ये च न० । अतिरिक्तं बलमस्य । अत्यन्तबलयुक्ते त्रि० "जयत्यतिबलो रामो लक्ष्मणश्च महाबल" इति रामा० । अतिरथे च भारते अतिरथविषयएव, "एष ह्यतिबलोमत" इति भीष्मेण भूरिशः प्रयुक्तत्वात् बलकार्य्यत्वाच्च तस्य तथात्वम् ।

**अतिबाला** स्त्री अतिक्रान्तो बालं बाल्यावस्थाम् । द्विवर्षवयस्कायाम् "वर्षमात्रा तु बाला स्यादतिबाला द्विवार्षिकीति" स्मृत्युक्तायाम् गवि "अतिवृद्धामतिकृशामतिबालां च रोगिणाम् हत्वा चरेदिति" स्मृतिः । अत्यन्तबाले त्रि० ।

**अतिब्रह्मचर्य्य** पु० अतिक्रान्तो ब्रह्मचर्य्यम् अत्या० स० । स्त्रीसङ्गमकारिणि ब्रह्मचर्य्यत्यागिनि ।

**अतिभारः** पु० अत्यन्तोभारः गुरुत्वम् स्वकार्य्यकरणे क्षमताविशेषो वा । अत्यन्तगौरवे अत्यन्तभारे, "न चातिभारः समर्थानामिति" । अतिशये "सा मुक्तकण्ठं व्यसनातिभारात् चक्रन्द विग्ना कुररीव भूय" इति रघुः । वेगे च ।

**अतिभारग** पु० अतिभारेण वेगेन गच्छति गम—ड ३त० । खरे अश्वतरे गर्द्दभाद्वडवाजाते अश्वभेदे ।

**अतिभी** स्त्री अतिबिभेत्यस्याः दर्शनात् अति+भी—क्विप् । वज्रज्वालायाम् । तद्दर्शने हि लोकानामतिभीतिर्लोकसिद्धा ।

**अतिभूमि** स्त्री अतिशयिता भूमिर्मर्य्यादा प्रा० स० । अतिमर्य्यादायाम्, आधिक्ये च । "प्राप्य मन्मथमदादतिभूमिं दुःसहस्तनभराः सुरतस्येति" माघः । अतिक्रमेऽव्ययी० । मर्य्यादातिक्रमेऽव्य० । भूमिं मर्य्यादां वाऽतिक्रान्ते त्रि० ।

**अतिभोजन** न० अत्यन्तं मर्य्यादामतिक्रम्य भोजनम् । यस्य यावत् भोजनमुचितं तदतिक्रमेण भोजने ।

**अतिमङ्गल्य** पु० अतिमङ्गलाय हितम् अतिमङ्गल+यत् । बिल्ववृक्षे । प्रा० ब० । अतिमङ्गलहिते त्रि० ।

**अतिमर्य्याद** अव्य० । अतिक्रमे अव्ययी० । मर्य्यादातिक्रमे । अतिक्रान्तो मर्य्यादाम् अत्या० स० । मर्य्यादामतिक्रान्तवति । यस्य वस्तुनः यावती सीमा तदतिक्रान्ते निर्मर्य्यादे त्रि० ।

**अतिमात्र** त्रि० अतिक्रान्तो मात्रामल्पं अत्या० स० । अतिशयिते, मात्रातिक्रमकर्त्तरि च । अतिशयिता मात्रा प्रमाणमस्य । भृशार्थे त्रि० । "मुनिव्रतैस्त्वामतिमात्रकर्शितामिति" कुमा० । अतिक्रान्तोमात्रां प्रमाणम् अत्या० स० । वृहत्प्रमाणे त्रि० । [वृत्तिवोमार्थे ।

**अतिमात्रशस्** अव्य० अतिमात्र+शस् । अतिप्रमाणकारक-

**अतिमान** पु० अत्यन्तः मानः अभिमानः । अनुचिताभिमाने "अतिमाने च कौरव" इति चाणक्यः । अतिक्रान्तोमानं प्रमाणम् अत्या० स० । प्रमाणाधिके त्रि० ।

**अतिमानुष** त्रि० अतिक्रान्तो मानुषचरित्रम् अत्या० स० । मनुष्यायोग्ये दिव्ये कर्म्मादौ । "कर्म्म तस्यातिमानुषमिति" पुरा० । तथाभूते रूपादौ च ।

**अतिमित्र** न० अत्यन्तं परमं मित्रम् । अत्यन्तबान्धवे "जन्मसम्पद्विपत् क्षेमं प्रत्यरिः साधकोवधः मित्रं परममित्रञ्चेति" ज्योतिषोक्ते नृणां जन्मताराविधि नवमाष्टादशसप्तविंशात्मके परममित्रतारके च ।

**अतिमुक्त** त्रि० अतिशयेन मुक्तः विदेहकैवल्यं गतः अति+मुच-कर्त्तरि क्त । निर्व्वाणमुक्तिमति । अतिक्रान्तो मुक्तां शौभ्र्यात् अत्या० स० । माधवीलतायां, तिनिशवृक्षे च पु० ।

**अतिमुक्तक** त्रि० अतिमुक्त+स्वार्थे कन् । निर्वाणमुक्तिमति अतिशयितमुक्ते च । मुचा भावे क्त अतिशयेन मुक्तं बन्धहीनता यस्य कप् । तिन्दुकवृक्षे, तालवृक्षे च पु० ।

**अतिमुक्ति** स्त्री अत्यन्ता मुक्तिः । विदेहकैवल्ये तत्त्वज्ञानानन्तरम् "तस्य तावदेव चिरं यावत् विमोक्ष्ये इति" श्रुतिदर्शिते शरीरत्यागे, अतिमोक्षादयोप्यत्रार्थे पु० ।

**अतिमृत्यु** पु० अतिक्रान्तो मृत्युम् अत्या० स० । मोक्षे "तमेव विदित्वाऽतिमृत्युमेति नान्यःपन्था विद्यते" इति श्रुतिः । स्वादृष्टादिभिः शरीरसंबन्धोहि जन्म, तद्वियोगश्च मरणम् तदभिमानिनोजीवस्य । सति च ज्ञाने तन्मूलाज्ञाने निवृत्ते तद्धेतुकशरीरसंबन्धादिकं तन्तुदाहे पटदाहवत् स्वयं निवर्त्तते अत एव ज्ञानवतो देहादिसंबन्धं श्रुतिर्निरास "अशरीरं